नित्यं सहस्रमाणेन जपेत् संवत्सरं यदि ।
ततः संजायते मन्त्री वाचस्पतिरिवापरः ॥
छन्दोऽलङ्कारतर्कादिनानाशास्त्रार्थविद्भवेत् ।
कवित्वं ज्ञानशक्त्या तु पाण्डित्यमधिकं भवेत्॥*
अथापरं प्रवक्ष्यामि योगं भुवि सुदुर्लभम् ।
नाभिचक्रस्थितां सौम्यां रक्ताकारां विचि-
न्तयेत् ॥
क्षौमाबद्धनितम्बाञ्च रत्नाभरणभूषिताम् ।
पाशाङ्कुशधरां दिव्यां वराभययुतां पुनः ॥
दृष्ट्वा चामृतवर्षिण्या पूरयन्तीं मनोरथान् ।
एवं ध्यात्वा जपेल्लक्षं मनुजो विहितं ततः ॥
होमं कुर्य्यात् त्रिमध्वक्तं रक्तोत्पलयुतैर्द्विजः ।
ततः सन्तर्पयेद्देवीं दुग्धयुक्तेन सर्पिषा ॥
पायसेन बलिं दद्यात् दधिपिष्टमधुप्लुतैः ।
एवं कृत्वा विधानन्तु साक्षाद्वैश्रवणो भवेत् ॥
सिद्धार्थैस्त्रिमधुरोपेतैर्हुत्वा जगद्वशं नयेत् ।
धान्यदानेन महतीं प्राप्नुयात् श्रियमूर्जिताम् ॥
देवीहृदयविद्याया नास्ति किञ्चित् सुदुर्लभम्
स्नेहभावेन सम्प्रोक्तं न देयं यस्य कस्यचित् ॥
एतत्ते कथितं दिव्यं विद्योत्पत्तेश्च कारणम् ।
विष्णुना दत्तमस्मभ्यं मया तुभ्यं द्विजोत्तम ॥
सिद्धमन्त्री यदा मन्त्री बालिशस्यापि मूर्द्धनि ।
हस्तं दत्त्वा जपेत् सोऽपि सौधीं वाचमन-
र्गलाम् ॥"
इति स्वायम्भुवमातृकातन्त्रे सारस्वतः पटलः ।
इति तन्त्रसारः ॥

सारस्वतव्रतः, पुं, (सारस्वतः सरस्वतीदेवताकः व्रतः ।) सरस्वत्या व्रतविशेषः । यथा,—

मनुरुवाच ।
"मधुरा भारती केन व्रतेन मधुसूदन ।
तथैव जनसौभाग्यमतिविद्यासुकौशलम् ॥
अभेदश्चापि दम्पत्योस्तथा बन्धुधनेन च ।
आयुश्च विपुलं पुंसां तन्मे कथय माधव ॥
मत्स्य उवाच ।
सम्यक् पृष्टं त्वया राजन् शृणु सारस्वतं व्रतम्
यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती ॥
यो यद्भक्तः पुमान् कुर्य्यादेतद्व्रतमनुत्तमम् ।
तद्वासरादौ संपूज्य विप्रानेतत् समारभेत् ॥
अथवादित्यवारेण ग्रहताराबलेन वा ।
पायसं भोजयेद्विद्वान् कृत्वा ब्राह्मणवाचनम् ॥
शुक्लवस्त्राणि दत्त्वा च सहिरण्यानि शक्तितः ।
गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपणैः ॥
यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत्
न विहीनं त्वया देवि तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्म्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा मतिः ।
एताभिः पाहि तनुभिरष्टाभिर्म्मां सरस्वति ॥
एवं सम्पूज्य गायत्रीं वीणाक्षमाल्यधारिणीम् ।
शुक्लपुष्पाक्षतैर्भक्त्या सकमण्डलुपुष्पकम् ॥
मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्म्मवित् ।
पञ्चम्यां प्रतिपक्षञ्च पूजयेत् शब्दवासिनीम् ॥
तथैव तण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
क्षीरं दद्याद्धिरण्यञ्च गायत्री प्रीयतामिति ॥
सन्ध्यायाञ्च तथा मौनमेतत् कुर्व्वन् समाचरेत् ।
नान्तराभोजनं कुर्य्यात् यावन्मासास्त्रयोदश ॥
समाप्ते तु व्रते दद्यात् भोजनं शुक्लतण्डुलैः ।
सुवर्णं वस्त्रयुग्मञ्च गाञ्च विप्राय शोभनाम ।
देव्या वितानं घण्टाञ्च सितनेत्रपटावृताम् ।
चन्दनं वस्त्रयुग्मञ्च दध्यन्नं शिखरं पुनः ।
तथोपदेष्टारमपि भक्त्या सम्पूजयेद्गुरुम् ॥
वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः ।
अनेन विधिना यस्तु कुर्य्यात् सारस्वतं व्रतम् ।
विद्यावानर्थयुक्तश्च व्यक्तकण्ठश्च जायते ॥
सरस्वत्याः प्रसादेन ब्रह्मलोके महीयते ।
नारी वा कुरुते या तु सापि तत्फलभागिनी
ब्रह्मलोके वसेद्राजन् यावत् कल्पायुतत्रयम् ।
सारस्वतं व्रतं यस्तु शृणुयादथवा पठेत् ।
विद्याधरपुरे सोऽपि वसेदब्दायुतत्रयम् ॥"
इति मत्स्यपुराणे । ६६ । १—२४ ॥

सारस्वताः, पुं भूम्नि, (सारस्वते भवाः । अण् ।) सारस्वतदेशजातमनुष्यः । यथा, हेमचन्द्रे ।
"काश्मीरास्तु माधुमताः सारस्वतास्तु विक-
र्णिकाः ॥"

सारस्वतोत्सवः, पुं, (सारस्वतः सरस्वतीसम्बन्धी उत्सवः ।) सरस्वत्या उत्सवः । इति तिथ्यादितत्त्वम् ॥ अस्य प्रमाणादिकं सरस्वतीशब्दे द्रष्टव्यम् ॥

सारा, स्त्री, (सारयतीति । सृ + णिच् + अच् । टाप् ।) कृष्णत्रिवृता । इति शब्दरत्नावली ॥ दूर्व्वा । इति शब्दचन्द्रिका ॥ (सेहुण्डभेदः ॥ शालता अनेन नाम्ना प्रसिद्धा ॥ यथा,—
"सालता सप्तला सारा विमला विदुला च सा
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सारालः, पुं, (सारेण सरणेन अलति पर्य्याप्नोतीति । अल अच् ।) तिलः । इति शब्दचन्द्रिका ॥

सारिः, पुं, स्त्री, (सरतीति । सृ + इण् ।) पाशकः । इति शब्दरत्नावली ॥

सारिका, स्त्री, (सरति गच्छतीति ॥ सृ + ण्वुल् टाप् ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ८ ॥ शालिक इति भाषा ॥ (यथा, रामायणे । २ । ५३ । २२ ।
"मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण !
सारिका ।
यत्तस्याः श्रूयते वाक्यं शुक पादमरेर्दंश ॥")
तत्पर्य्यायः । पीतपादा २ गोराटी ३ गोकिराटिका ४ । इति हेमचन्द्रः ॥ शारिका ५ सारी ६ शारी ७ चित्रलोचना ८ । इति शब्दरत्नावली ॥ मधुरालापा ९ पूती १० मेधाविनी ११ गोराण्टिका १२ गोकिराटी १३ गोरिका १४ कलहप्रिया १५ । इति राजनिर्घण्टः ॥

सारिणी, स्त्री, (सरतीति । सृ + णिनि । ङीप् ।) सहदेवी । कार्पासी । दुरालभा । कपिलशिंशपा । प्रसारिणी । रक्तपुनर्णवा । इति राजनिर्घण्टः ॥

सारिवा, स्त्री, लताविशेषः । अनन्तमूल इति ख्याता । गोरिया साउ इति हिन्दी भाषा । सा तु जम्बुवत्पत्रा दुग्धगर्भा व्रततिर्भवति । तत्पर्य्यायः । शारदा २ गोपी ३ गोपकन्या ४ गोपवल्ली ५ प्रतानिका ६ लता ७ आस्फोता ८ काष्ठसारिवा ९ । इति राजनिर्घण्टः ॥ गोपा १० उत्पलसारिवा ११ अनन्ता १२ शारिवा १३ श्यामा १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । हृष्यत्वम् । पित्तप्रणाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ कृष्णसारिवा । सा तु इन्द्रजम्बुवत्पत्रा सुगन्धा कलघण्टेति प्रसिद्धा । करिया साउ इति हिन्दी भाषा । श्यामालता इति वङ्गभाषा । तत्पर्य्यायः । कृष्णमूली २ कृष्णा ३ चन्दनसारिवा ४ भद्रा ५ चन्द्रनगोपा ६ चन्दना ७ कृष्णवल्ली ८ । अस्या गुणाः । त्रिदोषशमनत्वम् । तिक्तत्वम् । कटुरसत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"सारिवाद्वौ तु मधुरौ हिमौ भूतनिकृन्तनौ ।
कुष्ठकण्डुज्वरहरौ देहदुर्गन्धिनाशनौ ॥"
इति राजनिर्घण्टः ॥
किञ्च ।
"सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमान्द्यरुचिश्वासकासामविषनाशनम् ।
दोषत्रयास्रप्रदरज्वरातिसारनाशनम् ॥"
इति भावप्रकाशः ॥

सारि, स्त्री, (सारि + वा ङीष् ।) सारिकापक्षिणी । पाशकः । इति शब्दरत्नावली ॥ सप्तला । इति राजनिर्घण्टः ॥ (सप्तलाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

सारोष्ट्रिकः, पुं, (सारोष्ट्रे देशे भवः । सारोष्ट्र + ठञ् ।) विषभेदः । सारोष्ट्रो देशभेदस्तत्र भवः सारोष्ट्रिकः ढघे कादिति णिकः दन्त्यादिः । सुराष्ट्रशब्दात् सौराष्ट्रिकः । इति स्वामी । इत्यमरभरतौ । १ । ८ । १० ॥

सार्थः, पुं, (सरतीति । सृ + "सर्त्तेर्णिच ।" उणा० २ । ५ । इति थन् । स च णित् ।) जन्तुसंघः । इत्यमरः । २ । ६ । ४१ ॥ वणिक्समूहः । (यथा, रघुः । १७ । ६४ ।
"वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव ।
सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥")
समूहमात्रम् । इति मेदिनी ॥ (यथा, बृहत्संहितायाम् । ८६ । ४९ ।
"पश्चिमे शर्व्वरीभागे नोमृकोलूकपिङ्गलाः ।
सर्व्व एव विपर्य्यस्ता ग्राह्याः सार्थेषु योषि-
ताम् ॥")

सार्थः, त्रि, अर्थेन सह वर्त्तमानः । अर्थयुक्तः । इति हेमचन्द्रः ॥ यथा, वनपर्व्वणि ।